# शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः ।

कालिदासः संस्कृतमहाकविषु प्रातः स्मरणीयः भवति। कालिदासमहाकवेः उपमाप्रयोगचातुरीम् अधिकृत्य उपमा कालिदासस्य इति प्रथा प्रशस्यते। अत्रापि तादृशमेकं वर्णनं द्रष्टुं शक्यते।

पुत्रीवात्सल्यम् अनुभूय तथा पुत्रीवात्सल्यं प्रदाय च कण्वाश्रमे वसन्ती शकुन्तला स्नेहस्य उदात्तनिदर्शनत्वेन विराजते। अत एव प्रथमदर्शनेनैव राज्ञि दुष्यन्ते सा अनुरक्ता बभूव। विवाहात्परं स्वराजधानीं प्रतिनिवृत्तं दुष्यन्तं स्मृत्वैव महादुःखं चानुभवति। पुत्रीसंबन्धं वृत्तान्तं सर्वं विज्ञाय कण्वमहर्षि तां पतिगृहं प्रैषयत्। ततः परं शकुन्तलायाः सान्निध्यरहितं तपोवनं शोकाकुलं प्रतिभाति। तत् दृष्ट्वा शकुन्तलायाः प्रियसख्यौ अनसूयाप्रियंवदे स्वाभिप्रायं प्रकटयतः यद् **शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशावः इति**। वस्तुतः एवमनुमातुं शक्यते- आश्रमस्यास्य सर्वतोषप्रदायिनी आसीत् शकुन्तलेति।

# प्रत्यर्पितन्यास इवान्तरात्मा।

अभिज्ञानशाकुन्तले पितृस्नेहस्य मूर्तरूपेण वर्णितः भवति महर्षिः कण्वः। चतुर्थेऽङ्के अस्य सान्निध्यम् अनिवार्यमेव। लौकिकजीवने समग्रः सूक्ष्मः च स्नेहभावः तस्य प्राधान्यं च कालिदासवचोभिः ऋषिवर्ये कण्वे सन्निवेश्यते। यज्ञकर्मसु निमग्नो भूत्वा ऋषिजीवनं नीतवतस्तस्य मनसि मानविकतायाः भावाः स्पष्टं विराजन्ते। तत्तु कण्ववचनेनैव प्रतिपाद्यते- **वनौकसोऽपि सन्तः लोकज्ञाः वयम्** इति। अस्मादृशानां लौकिकानां मार्गदीप इवाभाति कण्वः। शकुन्तलायाः पतिगेहप्रेषणसमये स एवं वदति, यथा

अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदप्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ।। इति।

वस्तुतस्तु पुत्री परकीया भवति। परकीयं धनमिव बहुकालं परिपालितां कन्याम् अर्हाय पुरुषाय प्रत्यर्पितवान् इत्येवम् आश्वसन् कण्वः गृहस्थ इव आत्महर्षमनुभवति।